श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिंशः सर्गः ॥

## ब्रह्मणेन्द्रजिते वरं प्रदाय तद्बन्धनत इन्द्रस्य मोचनं तदीयं पूर्वकृतमघं स्मारयित्वा तत्कर्तृकवैष्णवयागस्यानुष्ठानाय सम्मतिदानं तं यज्ञं पूरयित्वेन्द्रस्य स्वर्गलोके गमनम्

जिते महेन्द्रेऽतिबले रावणस्य सुतेन वै।
प्रजापतिं पुरस्कृत्य ययुर्लङ्कां सुरास्तदा ॥ **7.30.1** ॥

तत्र रावणमासाद्य पुत्रभ्रातृभिरावृतम्।
अब्रवीद् गगने तिष्ठन् सामपूर्वं प्रजापतिः ॥ **7.30.2** ॥

वत्स रावण तुष्टोऽस्मि पुत्रस्य तव संयुगे।
अहोऽस्य विक्रमौदार्यं तव तुल्योऽधिकोऽपि वा ॥ **7.30.3** ॥

जितं हि भवता सर्वं त्रैलोक्यं स्वेन तेजसा।
कृता प्रतिज्ञा सफला प्रीतोऽस्मि ससुतस्य ते ॥ **7.30.4** ॥

अयं च पुत्रोऽतिबलस्तव रावण वीर्यवान्।
जगतीन्द्रजिदित्येव परिख्यातो भविष्यति ॥ **7.30.5** ॥

बलवान् दुर्जयश्चैव भविष्यत्येव राक्षसः।
यं समाश्रित्य ते राजन् स्थापितास्त्रिदशा वशे ॥ **7.30.6** ॥

तन्मुच्यतां महाबाहो महेन्द्रः पाकशासनः।
किं चास्य मोक्षणार्थाय प्रयच्छन्तु दिवौकसः॥ **7.30.7** ॥

अथाब्रवीन्महातेजा इन्द्रजित् समितिञ्जयः।
अमरत्वमहं देव वृणे यद्येष मुच्यते॥ **7.30.8** ॥

ततोऽब्रवीन्महातेजा मेघनादं प्रजापतिः।
नास्ति सर्वामरत्वं हि कस्यचित् प्राणिनो भुवि॥ **7.30.9** ॥

पक्षिणश्चतुष्पदो वा भूतानां वा महौजसाम्।
श्रुत्वा पितामहेनोक्तमिन्द्रजित् प्रभुणाव्ययम्॥ **7.30.10** ॥

अथाब्रवीत् स तत्रस्थं मेघनादो महाबलः।
श्रूयतां या भवेत् सिद्धिः शतक्रतुविमोक्षणे॥ **7.30.11** ॥

ममेष्टं नित्यशो हव्यैर्मन्त्रैः सम्पूज्य पावकम्।
सङ्ग्राममवतर्तुं च शत्रुनिर्जयकाङ्क्षिणः॥ **7.30.12** ॥

अश्वयुक्तो रथो मह्यमुत्तिष्ठेत् तु विभावसोः।
तत्स्थस्यामरता स्यान्मे एष मे निश्चितो वरः॥ **7.30.13** ॥

तस्मिन् यद्यसमाप्ते च जप्यहोमे विभावसौ।
युध्येयं देव सङ्ग्रामे तदा मे स्याद् विनाशनम्॥ **7.30.14** ॥

सर्वो हि तपसा देव वृणोत्यमरतां पुमान्।
विक्रमेण मया त्वेतदमरत्वं प्रवर्तितम्॥ **7.30.15** ॥

एवमस्त्विति तं चाह वाक्यं देवः पितामहः।
मुक्तश्चेन्द्रजिता शक्रो गताश्च त्रिदिवं सुराः॥ **7.30.16** ॥

एतस्मिन्नन्तरे राम दीनो भ्रष्टामरद्युतिः।
इन्द्रश्चिन्तापरीतात्मा ध्यानतत्परतां गतः॥ **7.30.17**॥

तं तु दृष्ट्वा तथाभूतं प्राह देवः पितामहः।
शतक्रतो किमु पुरा करोति स्म सुदुष्कृतम्॥ **7.30.18**॥

अमरेन्द्र मया बुद्ध्या प्रजाः सृष्टास्तथा प्रभो।
एकवर्णाः समाभाषा एकरूपाश्च सर्वशः॥ **7.30.19**॥

तासां नास्ति विशेषो हि दर्शने लक्षणेऽपि वा।
ततोऽहमेकाग्रमनास्ताः प्रजाः समचिन्तयम्॥ **7.30.20**॥

सोऽहं तासां विशेषार्थं स्त्रियमेकां विनिर्ममे।
यद् यत् प्रजानां प्रत्यक्षं विशिष्टं तत् तदुद्धृतम्॥ **7.30.21**॥

ततो मया रूपगुणैरहल्या स्त्री विनिर्मिता।
हलं नामेह वैरूप्यं हल्यं तत्प्रभवं भवेत्॥ **7.30.22**॥

यस्या न विद्यते हल्यं तेनाहल्येति विश्रुता।
अहल्येत्येव च मया तस्या नाम प्रकीर्तितम्॥ **7.30.23**॥

निर्मितायां च देवेन्द्र तस्यां नार्यां सुरर्षभ।
भविष्यतीति कस्यैषा मम चिन्ता ततोऽभवत्॥ **7.30.24**॥

त्वं तु शक्र तदा नारी जानीषे मनसा प्रभो।
स्थानाधिकतया पत्नी ममैषेति पुरन्दर॥ **7.30.25**॥

सा मया न्यासभूता तु गौतमस्य महात्मनः।
न्यस्ता बहूनि वर्षाणि तेन निर्यातिता च ह॥ **7.30.26**॥

ततस्तस्य परिज्ञाय महास्थैर्यं महामुनेः।
ज्ञात्वा तपसि सिद्धिं च पत्न्यर्थं स्पर्शिता तदा॥ **7.30.27** ॥

स तया सह धर्मात्मा रमते स्म महामुनिः।
आसन्निराशा देवास्तु गौतमे दत्तया तया॥ **7.30.28** ॥

त्वं क्रुद्धस्त्विह कामात्मा गत्वा तस्याश्रमं मुनेः।
दृष्टवांश्च तदा तां स्त्रीं दीप्तामग्निशिखामिव॥ **7.30.29** ॥

सा त्वया धर्षिता शक्र कामार्तेन समन्युना।
दृष्टस्त्वं स तदा तेन आश्रमे परमर्षिणा॥ **7.30.30** ॥

ततः क्रुद्धेन तेनासि शप्तः परमतेजसा।
गतोऽसि येन देवेन्द्र दशाभागविपर्ययम्॥ **7.30.31** ॥

यस्मान्मे धर्षिता पत्नी त्वया वासव निर्भयात्।
तस्मात् त्वं समरे शक्र शत्रुहस्तं गमिष्यसि॥ **7.30.32** ॥

अयं तु भावो दुर्बुद्धे यस्त्वयेह प्रवर्तितः।
मानुषेष्वपि लोकेषु भविष्यति न संशयः॥ **7.30.33** ॥

तत्रार्धं तस्य यः कर्ता त्वय्यर्धं निपतिष्यति।
न च ते स्थावरं स्थानं भविष्यति न संशयः॥ **7.30.34** ॥

यश्च यश्च सुरेन्द्रः स्याद् ध्रुवः स न भविष्यति।
एष शापो मया मुक्त इत्यसौ त्वां तदाब्रवीत्॥ **7.30.35** ॥

तां तु भार्यां सुनिर्भत्स्य सोऽब्रवीत् सुमहातपाः।
दुर्विनीते विनिध्वंस ममाश्रमसमीपतः॥ **7.30.36** ॥

रूपयौवनसम्पन्ना यस्मात् त्वमनवस्थिता।
तस्माद् रूपवती लोके न त्वमेका भविष्यति॥ **7.30.37** ॥

रूपं च ते प्रजाः सर्वा गमिष्यन्ति न संशयः।
यत् तदेकं समाश्रित्य विभ्रमोऽयमुपस्थितः॥ **7.30.38** ॥

तदाप्रभृति भूयिष्ठं प्रजा रूपसमन्विता।
सा तं प्रसादयामास महर्षिं गौतमं तदा॥ **7.30.39** ॥

अज्ञानाद् धर्षिता विप्र त्वद्रूपेण दिवौकसा।
न कामकाराद् विप्रर्षे प्रसादं कर्तुमर्हसि॥ **7.30.40** ॥

अहल्यया त्वेवमुक्तः प्रत्युवाच स गौतमः।
उत्पत्स्यति महातेजा इक्ष्वाकूणां महारथः॥ **7.30.41** ॥

रामो नाम श्रुतो लोके वनं चाप्युपयास्यति।
ब्राह्मणार्थे महाबाहुर्विष्णुर्मानुषविग्रहः॥ **7.30.42** ॥

तं द्रक्ष्यसि यदा भद्रे ततः पूता भविष्यसि।
स हि पावयितुं शक्तस्त्वया यद् दुष्कृतं कृतम्॥ **7.30.43** ॥

तस्यातिथ्यं च कृत्वा वै मत्समीपं गमिष्यसि।
वत्स्यसि त्वं मया सार्धं तदा हि वरवर्णिनि॥ **7.30.44** ॥

एवमुक्त्वा स विप्रर्षिराजगाम स्वमाश्रमम्।
तपश्चचार सुमहत् सा पत्नी ब्रह्मवादिनः॥ **7.30.45** ॥

शापोत्सर्गाद्धि तस्येदं मुनेः सर्वमुपस्थितम्।
तत् स्मर त्वं महाबाहो दुष्कृतं यत् त्वया कृतम्॥ **7.30.46** ॥

तेन त्वं ग्रहणं शत्रोर्यातो नान्येन वासव।
शीघ्रं वै यज यज्ञं त्वं वैष्णवं सुसमाहितः॥ **7.30.47**॥

पावितस्तेन यज्ञेन यास्यसे त्रिदिवं ततः।
पुत्रश्च तव देवेन्द्र न विनष्टो महारणे॥ **7.30.48**॥

नीतः सन्निहितश्चैव आर्यकेण महोदधौ।
एतच्छ्रुत्वा महेन्द्रस्तु यज्ञमिष्ट्वा च वैष्णवम्॥ **7.30.49**॥

पुनस्त्रिदिवमाक्रामदन्वशासच्च देवराट्।
एतदिन्द्रजितो नाम बलं यत् कीर्तितं मया॥ **7.30.50**॥

निर्जितस्तेन देवेन्द्रः प्राणिनोऽन्ये तु किं पुनः।
आश्चर्यमिति रामश्च लक्ष्मणश्चाब्रवीत् तदा॥ **7.30.51**॥

अगस्त्यवचनं श्रुत्वा वानरा राक्षसास्तदा।
विभीषणस्तु रामस्य पार्श्वस्थो वाक्यमब्रवीत्॥ **7.30.52**॥

आश्चर्यं स्मारितोऽस्म्यद्य यत् तद् दृष्टं पुरातनम्।
अगस्त्यं त्वब्रवीद् रामः सत्यमेतच्छ्रुतं च मे॥ **7.30.53**॥

एवं राम समुद्भूतो रावणो लोककण्टकः।
सपुत्रो येन सङ्ग्रामे जितः शक्रः सुरेश्वरः॥ **7.30.54**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिंशः सर्गः॥